अथ किमर्थं मित्रयुशब्दो बिदादिष्वेव (४.१.१०४/११०६) न पठ्यते, [1]तत्राञि कृते यादेः इति इयादेशेनैव सिद्धम्, एवं च युलोपार्थं निपातनं कर्तव्यं न भवति, यस्कादिषु (२.४.६३/११४६) च बहुषु लुगर्थः पाठो न कर्तव्यो भवति, मित्रयवः इत्यत्रः 'यञञोश्च' (२.४.६४/११८) इत्येव हि लुकः सिद्धत्वात् ? नैतदस्ति । मित्रयूणां सङ्घः इत्यत्र गोत्रचरणाद् वुञ् (४.३.१२६/१५०६) बाधित्वा मैत्रेयकः सङ्घः इत्यत्र 'सङ्घाङ्कलक्षणेष्वञ्यञिञामण्' (४. ३.१२७/१५०७) इति अण् प्राप्नोति ।

हिरण्मयम् इति हिरण्यस्य मयटि यादिलोपो निपात्यते, हिरण्यस्य विकारः हिरण्मयः ॥

## ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि । (१७५/३८८६)

ऋत्व्य वास्त्व्य वास्त्व माध्वी हिरण्यय इत्येतानि निपात्यन्ते छन्दसि विषये । ऋतु वास्तु इत्येतयोः[2] यति यणादेशो निपात्यते । ऋतौ भवं ऋत्व्यम् (पै. १९.२५.१४) । वास्तौ भवं वास्त्व्यम् । वस्तुशब्दस्याणि यणादेशो निपात्यते । वस्तुनि भवः वास्त्वः । मधुशब्दस्य अणि स्त्रियां यणादेशो निपात्यते । 'माध्वीर्नः सन्त्वोषधीः' (ऋ. १.९०.६) । हिरण्यशब्दाद् विहितस्य मयटो [3]मशब्दस्य लोपो निपात्यते । हिरण्ययम् (ऋ. १.२५.१३) ॥

इति श्रीवामनविरचितायां काशिकायां वृत्तौ
षष्ठाध्यायस्य चतुर्थः पादः ॥

----(०)----

1. तत्राञि .... भवति नास्ति फ. 2. भावे छन्दसि इत्यधिकम् ह. 3. मशब्दलोपः क.